SANSKRIT STUDY MADE EASY SERIES - 8
Approved by the Text Book Committee

# ॥ श्रीरामोदन्तम् ॥

## ललितटिप्पण्यादिसमेतम्

# SRI RAMODANTA

A Simple Sanskrit Poetry Text

*Published by*

**R. S. VADHYAR & SONS**
BOOK-SELLERS & PUBLISHERS
KALPATHI, PALGHAT - 678 003
S. INDIA

2006 Rs. 20/-

## SANSKRIT STUDY MADE EASY SERIES No. 5

## A REFORMED SERIES OF FOUR ILLUSTRATED SANSKRIT READERS

| | | |
|---|---|---|
| Infant Reader | संस्कृत बालादर्शः | 20.00 |
| Reader I | संस्कृत प्रथमादर्शः | 18.00 |
| Reader II | संस्कृत द्वितीयदर्शः | 20.00 |
| Reader III | संस्कृत तृतीयादर्शः | 18.00 |

## USEFUL GRAMMAR BOOKS FOR STUDENTS

Easy Texts on Sanskrit Grammar - संस्कृतव्याकरण ग्रन्थाः

1. शब्दमंजरी Declension of nouns - तिङन्त-अव्यय-समास प्रकरण-शब्दार्थकोश सहिताः Enlarged Edition 25.00

2. धातुरुपमंजरी - Conjugation of Verbs-Deals with 500 most common roots 25.00

3. संस्कृत व्याकरण प्रवेशिका - 47 Lessons dealing on Nouns, Grammar, Verbs, Tenses, Parsing etc. 15.00

4. **EXERCISES IN SANSKRIT TRANSLATION** - With Guidelines for Translation from Sanskrit to English and vice-versa 15.00

Easy text on Sanskrit Poetry लघु काव्य ग्रन्थाः

श्रीरामोदन्तम्-With Instructive Notes in Sanskrit to English 20.00

Sanskrit Copy Books - संस्कृत प्रतिलेखांजलिः

No. 1 Bold Hand (स्थूललिपिः) No. 2 Medium Hand (मध्यमलिपिः) and No. 3 Small Hand (सूक्ष्मलिपिः)

Each Rs. 8/-

श्रीरामजयम्

# ॥ श्रीरामोदन्तम् ॥

## ललितटिप्पण्यादिसमेतम्

# SRI RAMODANTA

## A Simple Sanskrit Poetry Text

WITH EXHAUSTIVE-NOTES, VALUABLE GRAMMATICAL INSTRUCTIONS AND MODEL QUESTIONS

---

*Edited with Foot-Notes by*

Pandit L.ANANTARAMA SASTRI

*Sahitya Ratna, Vidwan, Siromani, etc.*

*Retired Senior Sanskrit Pandit,*

Government Motilal High School.

PALGHAT

---

*Published by*

**R. S. VADHYAR & SONS**

BOOK-SELLERS & PUBLISHERS

KALPATHI: PALGHAT - 678 003.

S.INDIA

**2006**

॥ विद्यया विन्दते अमृतम् ॥



# Sanskrit Study Made Easy Series

**A Reformed Series of Four Illustrated Sanskrit Readers.**

With Grammatical Conversational Exercises,
Glossary etc.,

For a Pleasant & Quick Study of Sanskrit

Most widely used throughout India and Foreign Countries
Viz : Ceylon, Siam, Bangkok, Germany, Italy, Australia,
California, San Francisco etc.,

AND SELECTED BY THE EMBASSY OF INDIA

*and The Ministry of Education and Scientific Research of Covt. of India for Presentation to Foreign Students of Sanskrit.*

*Printed at*

Ebenezer, Thrissur - 12. Ph: 2361892

॥ श्रीरामजयम् ॥



धन्याऽयोध्या दशरथनृपः सा च माता च धन्या
धन्यो वंशो रघुपतिभवो यत्र रामावतारः ।
धन्या वाणी कविवरमुखे रामनामप्रसन्ना
धन्यो लोकः प्रतिदिनमसौ रामवृत्तं शृणोति ॥ १

वैदेहीसहितं सुरद्रुमतले हैमे महामण्टपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

यो दण्डकारण्यनिशाचरेन्द्रान् कोदण्डलीलाविषयीचकार ।
वेतण्डशुण्डायितबाहुदण्डः कोदण्डपाणिः कुलदैवतं नः ॥ ३

## ॥ प्रार्थनश्लोकाः ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानाम् एकदन्तमुपास्महे ॥ १
सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ २
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥ ३
कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ४
गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ५
श्लोकसारजलाकीर्णं सर्गकल्लोलसङ्कुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ ६
आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ७
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ८
नमः क्षीरार्णवसुते नमो जनकनन्दिनि ।
रक्ष सीते जगन्मातः रघुनाथस्यवल्लभे ॥ ९
मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ १०

॥ शुभं भूयात् ॥

॥ श्री गणेश शारदा गुरुभ्यो नमः ॥

॥ श्री सीतालक्ष्मणभरतशत्रुघ्नहनूमत्समेत श्रीरामचन्द्रस्वामिने नमः ॥

# ॥ श्रीरामोदन्तम् ॥

## बालकाण्डः ॥

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥ १

---

श्रीरामोदन्तम् *n* श्रीरामस्य उदन्तः, श्रीरामोदन्तः प्रतिपाद्यते अस्मिन् (पुस्तके) इति श्रीरामोदन्तम् । The book which tells the story of श्रीराम । This story is taken from श्रीमद्वाल्मीकिरामायण which is written by Sage Valmiki, consisting of 24000 Slokas in seven Kandas.

1. श्रीपतिः *m* श्रियः पतिः = महाविष्णुः । पतिशब्द is different from हरिशब्द । When it stands at the end of a समास (compound) *viz.*, श्रीपति, गणपति, सीतापति, भूपति etc., it is declined like हरिशब्द । Refer to शब्दमञ्जरी Page 8. प्रणिपत्य = प्र + नि + पतित्वा *ind.* नमस्कृत्य । श्रीवत्स is a mark on the right chest of महाविष्णु ।

---

**Abreviations used:** *N.* Noun विशेष्यम् । *a* Adjective विशेषणम्—can be used in 3 genders. *m* Masculine. *f* Feminine, *n* Neuter. *P.* परस्मैपदी । *A.* आत्मनेपदी । *ind.* अव्ययम् ।

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥ २

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।
वव्रिरे च वरानिष्टान् अस्मादाश्रितवत्सलात् ॥ ३

रावणो मानुषादन्यैः अवध्यत्वं तथाऽनुजः ।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ॥ ४

---

श्रीवत्सेन अङ्कितं वक्षः यस्य सः = श्रीवत्साङ्कितवक्षाः, तम् । श्रीरामोदन्तम् *m* story of श्रीराम । Note here the मङ्गलवाचकशब्द 'श्री' used in all the 4 पादाः of this Sloka.

2. विश्रवस् *m* The name of a sage—the son of पुलस्त्य । विश्रवस् had two wives called कैकसी, and इडविडा । रावण, कुम्भकर्ण, विभीषण and शूर्पणखा were born to him by कैकसी while कुबेर was born by इडविडा । नाम *ind.* = by name आसीत्-आस्तां-आसन् । Imperfect (लङ्) of अस् *P.* = to be.

3. तीव्र *a* Severe. वेधस् *m* ब्रह्मा । आश्रितेषु वत्सलः = आश्रितवत्सलः *m* = Sympathetic towards devotees. वव्रे-वव्राते-वव्रिरे Perfect (लिट्) of वृ (वृणीते) to choose (आत्मनेपदी) ॥

4. अवध्यस्य भावः = अवध्यत्वम् *n* freedom from being killed. निष्क्रान्तः देवेभ्यः निर्देवः । निर्देवस्य भावः निर्देवत्वम् । तस्य इच्छा = निर्देवत्वेच्छा, तया by the desire that he should surpass Gods. कुम्भकर्ण

विभीषणो विष्णुभक्तिं वव्रे सत्वगुणान्वितः ।
तेभ्य एतान् वरान् दत्वा तत्रैवान्तर्दधे प्रभुः ॥ ५

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् ।
लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत् सुखम् ॥ ६

यातुधानास्ततः सर्वे रसातलनिवासिनः ।
दशाननं समाश्रित्य लङ्कां च सुखमावसन् ॥ ७

---

instead of asking for निर्देवत्व, by the slip of tongue asked for निद्रावत्व, i e., constant and long sleep. अवृणीत Imperfect of वृ (वृणीते) to choose.

5. सत्वगुणैः अन्वितः = सत्वगुणान्वितः *m* endowed with good qualities. गुणाः are three—सत्व, रजस् and तमस् । अन्तः+दधे Perfect of धा (धत्ते) to bear. अन्तर्दधे = disappeared.

6. धनस्य अधिपः = धनाधिपः = कुबेरः । He is said to be the treasurer of Gods. पुष्पमिव = पुष्पकम् *n* which shines like a flower (in the sky). The airy vehicle of कुबेर । अवसत् = The imperfect of वस् (वसति) to dwell.

7. यातुधानाः *m* = राक्षसाः । रसातलम् *n* पातालम् = The world below the earth. दशाननः *m* दश आननानि यस्य सः = having ten heads, i. e., रावण । आ+अवसन् = आवसन् । The root वस् with the preposition आ governs the accusative (द्वितीया) ।

मन्दोदरीं मयसुतां परिणीय दशाननः ।
तस्यामुत्पादयामास मेघनादाह्वयं सुतम् ॥ ८

रसां रसातलं चैव विजित्य स तु रावणः ।
लोकानाक्रमयन् सर्वान् जहार च विलासिनीः ॥ ९

---

8. मन्दं उदरं यस्याः सा = मन्दोदरी *f* (कृशोदरी इत्यर्थः) । मयसुता = The daughter of मय, the architect of demons (असुराः) ।

परि + नीत्वा = परिणीय = Having married. Note the न् of नय् is changed to ण् ।

नी (नय्) to lead. When the preposition परि is prefixed to it, it means to marry. Generally the meanings of roots differ, when the prepositions are prefixed. So it is said :—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहार विहार परिहारवत् ॥

मेघस्य नाद इव नादः यस्य सः = मेघनादः । He is also called इन्द्रजित् । आह्वय *m* = Name.

उत् + पादयामास = Perfect of उत्पादयति ॥

9. रसा *f* = earth. रसातल *n* = पाताल । विलासिनीः *f* (Accusative Plural) = Ladies.

जहार, जह्रतुः, जह्रुः = Perfect of हृ—हर् (हरति) to take away.

दूषयन् वैदिकं कर्म द्विजानर्दयति स्म सः ।
आत्मजेन ततो युद्धे वासवं चाप्यपीडयत् ॥ १०
तदीयतरुरत्नानि पुनरानाय्य किङ्करैः ।
स्थापयित्वा तु लङ्कायाम् अवसच्च चिराय सः ॥ ११
ततस्तस्मिन्नवसरे विधातारं दिवौकसः ।
उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् ॥ १२

10. वैदिकं *a* = वेदेषु प्रोक्तम् prescribed in वेदाः । द्विः जायन्ते इति = द्विजाः *m* twice born castes, namely ब्राह्मण, क्षत्रिय and वैश्यास. द्विजाः also means teeth and birds. (दन्त विप्राण्डजाः द्विजाः) । अर्दयति = Present tense of अर्द् to afflict. The present tense with स्म denotes the past tense, i e , पठति स्म = अपठत् । आत्मजः *m* = a son. वासवः *m* = इन्द्रः । अपीडयत् = Imperfect of पीड् to trouble.

11. तरुरत्नानि = the finest of trees, namely कल्पकवृक्ष or wish yielding trees. Note here the sense of the word रत्न ।

"जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते" ॥

आनाय्य (ल्यबन्तम् अव्ययं) = having brought. किङ्कर *m* = a servant. चिराय *ind.* = for a long time. This is अव्यय though it resembles चतुर्थी विभक्ति । Similarly चिरं, चिरेण, चिरात्, चिरस्य, all these are अव्ययास.

12. द्यौः ओकः येषां ते = दिवौकसः *m* Whose abode is Heaven, i. e., देवाः । ऊचे, ऊचाते, ऊचिरे = Perfect (लिट्) of ब्रू to tell (आत्मनेपदी) । विधाता *m* = ब्रह्मा ॥

तदाकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेस्तटम् ।
तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः ॥ १३

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् ।
किमर्थमागतोऽसि त्वं साकं देवगणैरिति ॥ १४

ततो दशाननात् पीडाम् अजस्तस्मै न्यवेदयत् ।
तच्छ्रुत्वोवाच धातारं हर्षयन् विष्टरश्रवाः ॥ १५

अलं भयेनात्मयोने! गच्छ देवगणैः सह ।
अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् ॥ १६

---

13. आकर्ण्य *ind.* = श्रुत्वा । साकं *ind.* = along with. साकं, सार्धं, समं, सह these are all अव्ययाs (Indeclinables) and govern तृतीया विभक्ति ।
दुग्धोदधि *m*=क्षीरसागरः, The seat of God Vishnu.
हृषीकेशः *m* = विष्णुः । तुष्टाव, तुष्टुवतुः, तुष्टुवुः = Perfect of स्तु (स्तौति) = to praise.

14. आविर्भूय *ind.* = appearing before. The opposite word is अन्तर्धाय । दैत्यारिः = दैत्यानां अरिः = The enemy of Asuras = महाविष्णुः । पितामहः *m* = ब्रह्मा ॥

15. न जायते इति=अजः One without birth, i. e. ब्रह्मा।
नि + अवेदयत् = Imperfect of निवेदयति ।
तत्+श्रुत्वा=तच्छ्रुत्वा । उवाच, ऊचतुः, ऊचुः = Perfect of ब्रू to tell (परस्मैपदी)। विष्टरश्रवाः *m*=Lord Vishnu.

16. अलं *ind.* = enough of. It governs the instrumental case (तृतीया विभक्ति)। आत्मयोनिः *m* = The

आत्मांशैश्च सुराः सर्वे भूमौ वानररूपिणः ।
जायेरन् मम साहाय्यं कर्तुं रावणनिग्रहे ॥ १७

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।
पद्मयोनिस्तु गीर्वाणैः समं प्रायात् प्रहृष्टधीः ॥ १८

अजीजनत् ततः शक्रो वालिनं नाम वानरम् ।
सुग्रीवमपि मार्तण्डो हनुमन्तं च मारुतः ॥ १९

पुरैव जनयामास जाम्बवन्तं च पद्मजः ।
एवमन्ये च विबुधाः कपीनजनयन् बहून् ॥ २०

---

self born, i. e. ब्रह्मा । दशरथस्य अपत्यं पुमान्=दाशरथिः=Son of Dasaratha. हनिष्यामि=Second Future of हन् to kill.

17. आत्मांशैः=with innate Nature. जायेरन्=The potential mood of जन् (जायते) to take birth. सहायस्य भावः=साहाय्यम् *n*=help.

18. पद्मं योनिः यस्य सः=पद्मयोनिः The lotus born, i. e. ब्रह्मा । गीर्वाणैः समम्=Along with the देवाः । गीर्वाणाः=देवाः । प्र+अयात्=Imperfect of या (याति) to go.

19. अजीजनत्=gave birth to. Aorist (लुङ्) of जनयति । शक्रः=इन्द्रः । मार्तण्डः=सूर्यः । मारुतः=वायुः ॥

20. जनयामास=Perfect (लिट्) of जनयति । पद्मात् जायते इति=पद्मजः=ब्रह्मा । विबुधाः=देवाः ॥

ततो वानरसङ्घानां वाली परिवृढोऽभवत् ।
अमीभिरखिलैः साकं किष्किन्धामध्युवास च ॥ २१

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।
भार्यास्तिस्रोऽपि लब्ध्वाऽसौ तासु लेभे न सन्ततिम् ॥

ततः सुमन्त्रवचनात् ऋश्यश्रृङ्गं स भूपतिः ।
आनीय पुत्रकामेष्टिम् आरेभे सपुरोहितः ॥ २३

अथाग्नेरुत्थितः कश्चित् गृहीत्वा पायसं चरुम् ।
एतत्प्राशय पत्नीस्त्वम् इत्युक्त्वाऽदान्नृपाय सः ॥ २४

---

21. परिवृढः *m* = Leader. अखिलैः *a* = सर्वैः । अधि + उवास = Perfect of वस् (वसति) to dwell. किष्किन्धां अध्युवास—The root वस् with अधि, उप, अनु or आ governs the acsusative case, i. e., विष्णुः वैकुण्ठं अधिवसति for विष्णुः वैकुण्ठे वसति ॥

22. दशरथः *m* = दशसु (दिक्षु अप्रतिहतः) रथः यस्य सः = Whose chariot is unobstructable in the 10 directions. सूर्यवंशः *m* = Solar race. पार्थिवः = राजा । लेभे, लेभाते, लेभिरे । Perfect of लभ् (लभते) to get.

23. सुमन्त्र *m* = The minister of दशरथ । ऋश्यश्रृङ्ग *m* = name of a sage. पुत्रकामेष्टि *f* = a Yaga which is performed for getting issues. आ + रेभे = began. perfect of आरभते । पुरोहितेन सह वर्तते इति = सपुरोहितः ॥

24. उत्थितः *a* = Arose. पायसं चरुं = Milk pottage or rice cooked in milk and used as an oblation.

तद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।
ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् ॥ २५

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।
अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ २६

ततो लक्ष्मणशत्रुघ्नौ सुमित्राऽजीजनत् सुतौ ।
अकारयत् पिता तेषां जातकर्मादिकं द्विजैः ॥ २७

---

प्राशय = Imperative लोट् of प्राशयति = causes to eat. प्राशय governs 2 objects एतत् and पत्नीः । अदात् = The Aoirst form of दा (ददाति) to give. दा and other roots having the same sense, govern the dative (चतुर्थी) of person to whom something is given.

25 प्र+आशयत् = Imperfect of प्राशयति । उत्सुकः *a* = eager. अधारयन् = Bore. Imperfect of धारयति ॥

26. सज्जनाः एव अम्भोजानि तेषां भास्करः, तम् = सज्जनाम्भोजभास्करम् like the sun to the lotuses in the form of good person's. Rama is described here as pleasing good persons like the sun the lotuses. रामः चन्द्रः इव = रामचन्द्रः ॥

27. अकारयत् — Imperfect of कारयति (causal form). जातकर्म आदि यस्य तत् = जातकर्मादिकम् *n* = जातकर्म and other rites.

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।
सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥ २८

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥ २९

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥ ३०

---

28. ववृधिरे = Perfect of वृध् (वर्धते) to grow.

अन्योन्यं स्निग्धाः = Friendly towards one another. नैपुण्यम् = Skill. निपुणस्य भावः = नैपुण्यम् ॥

29. विश्वस्य मित्रम् = विश्वामित्रः = By birth विश्वामित्र was a क्षत्रिय but by his severe तपस् he became a ब्रह्मर्षि । Note here the grammatical peculiarity, i. e., the last Vowel अ in the word विश्व is lengtened i.e., विश्व + मित्र = विश्वामित्र । महांश्चासौ मुनिश्च = महामुनिः । शक्तिधरोपमम् *m* = equal to Lord सुब्रह्मण्य (in Valour). ययाचे = Perfect of याच् (याचते) to beg. ययाचे, ययाचाते, ययाचिरे ॥

30. कृच्छ्रेण = with great difficulty. नृणां पतिः = नृपतिः । कौशिकस्य करे ददौ = handed over to the sage कौशिक (विश्वामित्र) । ददौ = Perfect of दा (ददाति) = to give.

तौ गृहीत्वा ततो गच्छन् बलामतिबलां तथा ।
अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥ ३१

गच्छन् सहानुजो रामः कौशिकेन प्रचोदितः ।
ताटकामवधीद्धीमान् लोकपीडनतत्पराम् ॥ ३२

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः ।
अध्वरं च समारेभे राक्षसाश्च समागमन् ॥ ३३

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।
सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ॥ ३४

---

31. बला and अतिबला are 2 मन्त्राs by uttering which hunger and thirst can be suppressed. समग्राणि *n* = सर्वाणि । उपदिदेश = Instructed. उप + दिदेश = Perfect of दिश् = to give.

32. अनुजेन सह वर्तते इति = सहानुजः । प्रचोदितः *a* = induced. अवधीत् *a* = Aorist of हन् (हन्ति) = to kill. धीः अस्य अस्तीति = धीमान् *a* intelligent.

33. सिद्धानां आश्रमः=सिद्धाश्रमः=The place frequented by sages. राघवेण सह वर्तते इति सहराघवः । अध्वरः= यागः । सं+आ+अगमन् = समागमन् = Aorist of गम् (गच्छति) = to go.

34. क्षिप्त्वा *ind.* = Having thrown away.
अर्णवः = समुद्रः । सुबाहुः प्रमुखः येषां ते, तान् = सुबाहुप्रमुखान्, headed by सुबाहु । अपालयत्=Protected. Imperfect of पालयति ॥

कौशिकेन ततो रामो नीयमानः सहानुजः ।
अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥ ३५

जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।
सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥ ३६

---

35. सं+प्र+आप=The perfect of आप् (आप्नोति) to obtain. मैथिलम्=The king of मिथिलाs=जनकः। अहल्याशापनिर्मोक्षं कृत्वा=having liberated अहल्या from the curse (of her husband). अहल्या was the wife of sage गौतम। She was a handsome lady. इन्द्र wanted to make her his love. One day he came to the hermitage of गौतम when the latter had gone away for taking bath. इन्द्र now took the form of गौतम and got into the hermitage. गौतम knowing this, cursed his wife to become a stone for a long time. When Rama touched that stone with his feet she resumed her former form. She is considered to be one of the five पतिव्रताs.

viz. अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम् ॥

36. सीता निमित्तम् यस्य तत्=सीतानिमित्तम् *n*=Connected with the marriage of सीता। Janaka's Vow was that the prince who employs शिवधनुस् would marry his daughter सीता। बभञ्ज=Perfect of भञ्ज् (भनक्ति)=to break. Note that

ततो दशरथं दूतैः आनाय्य मिथिलाधिपः ।
रामादिभ्यस्ततस्तेभ्यः सीताद्याः कन्यका ददौ ॥ ३७

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः ।
राघवो निर्ययौ तेन जनकेनोरु मानितः ॥ ३८

तदाकर्ण्य धनुर्भङ्गम आयान्तं रोषभीषणम् ।
विजित्य भार्गवं रामम् अयोध्यां प्राप राघवः ॥ ३९

ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः ।
तामध्युवास काकुत्स्थः सीतया सहितः सुखम् ॥ ४०

॥ इति श्रीरामोदन्ते बालकाण्डः समाप्तः ॥

---

Rama not only raised and employed it, but also broke it. ईश्वरस्य इदं = ऐश्वरम् *a* = belonging to Lord Siva.

37. रामादयः = रामः लक्ष्मणः भरतः शत्रुघ्नः । सीताद्याः = सीता ऊर्मिला माण्डवी श्रुतकीर्तिः ।

38. नियोगः *m* = order. कृतः उद्वाहः येन सः = कृतोद्वाहः = one who has married. निर्+ययौ = Perfect of या (याति) = to go. उरु *ind.* = greately.

39. भृगोः अपत्यं पुमान् = भार्गवः = Son of भृगु । भार्गवं रामम् = परशुरामम् । प्र+आप = प्राप — went.

40 स्वकैः चेष्टितैः = by his actions. काकुत्स्थ=ककुत्स्थस्य गोत्रापत्यं पुमान् । A descendant of ककुत्स्थ – रामः ॥

## अथ अयोध्याकाण्डः ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥ १

ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः ।
अभिषेकाय रामस्य समारेभे मुदाऽन्वितः ॥ २

कैकेयी तु महीपालं मन्थरादूषिताशया ।
वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥ ३

---

1. एतस्मिन्नन्तरे *n* = in the meanwhile. गेहं *n* = गृहम् । मातुल *m* = maternal uncle. युधाजित् *m* = The son of the king of केकयाs = The brother of कैकेयी ॥

2. प्रकृति *f* = minister (also subjects). अभि + सेकः = अभिषेकः = coronation. The स् of सेक is changed to ष् ॥

3. मन्थरया दूषितः आशयः यस्याः सा = मन्थरादूषिताशया = Whose mind is spoiled by मन्थरा । मन्थरा is a maid-servant of कैकेयी । सङ्गरः = प्रतिज्ञा । सत्यः सङ्गरः यस्य सः = सत्यसङ्गरः = One who is true to his words. वरद्वयं पुरा दत्तम् — The two boons promised formerly to her "पुरा दशरथः देवानां प्रार्थनया रथमारुह्य असुरैः सह युद्धमकरोत् । तदा कैकेयी

वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।
तस्या वरद्वयं कृच्छ्रम् अनुजज्ञे महीपतिः ॥ ४

रामं तदैव कैकेयी वनवासाय चादिशत् ।
अनुज्ञाप्य गुरून् सर्वान् निर्ययौ च वनाय सः ॥ ५

दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।
संत्यज्य स्वगृहान् सर्वे पौराश्चानुययुर्द्रुतम् ॥ ६

वञ्चयित्वा कृशान् पौरान् निद्राणान् निशि राघवः ।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत् ॥ ७

---

सारथ्यम् आवहत् । रथचक्ररक्षकं कीलं भग्नं दृष्ट्वा कैकेयी स्वाङ्गुलिं तत्स्थाने निवेश्य रथं चालयति स्म । एवं तया रक्षितो दशरथः वरद्वयं तस्यै ददौ" इति कथा ॥

4. राज्यस्य आप्तिः राज्याप्तिः / तस्यै = राज्याप्त्यै । अनु + जज्ञे the perfect of अनुजानीते (permits).

5. आ+अदिशत्, आदिशत् । निर् + ययौ=निर्ययौ । अनुज्ञाप्य गुरून् सर्वान् = taking leave of all elders.

6. अनुजगाम, अनुजग्मतुः, अनुजग्मुः—the perfect of गम् = to go. स्वगृहाः Always masculine plural. गृहाः पुंसि च भूम्न्येव इति अमरः । पुरे भवाः = पौराः = Citizens. अनु+ययुः = Followed.

7. कृशान् *m* = Dejected. वाह्यमान *a* Driven by.

शृङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः ।
गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥ ८

सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।
गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥ ९

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।
राघवस्तस्य निर्देशात् चित्रकूटेऽवसत् सुखम् ॥ १०

अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः ।
राज्ञे न्यवेदयत् सर्वं राघवस्य विचेष्टितम् ॥ ११

---

8. शृङ्गिबेरपुरं = गङ्गातीरस्थं गुहस्य आवासभूतं स्थानम् । गङ्गाकूले *n* = On the bank of the Ganges. उवास, ऊषतुः, ऊषुः = The perfect of वसति । एकां निशामुवास—Here the Accusative case denotes the duration of time.

9. सन्निमन्त्र्य = Having taken leave of. नावा the Instrumental case of नौः *f*=A boat. सं+ततार- the perfect of तृ = तर्—to cross. ततार, तेरतुः, तेरुः । जाह्नवी *f* = The Ganges.

10. तस्य निर्देशात् = On his advice.

11. शोकेन विह्वलः = शोकविह्वलः = affected by grief. नि + अवेदयत् = Informed, the Imperfect of नि + वेदयति । विचेष्टितम् *n* = Action.

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।
राम रामेति विलपन् देहं त्यक्त्वा दिवं ययौ ॥ १२

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।
दूतैरानाययामासुः भरतं मातुलालयात् ॥ १३

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।
संस्कारादि चकारास्य यथाविधि सहानुजः ॥ १४

---

12. आकर्ण्य *ind.* = श्रुत्वा । दुःखेन विमूढा धीः यस्य सः = दुःखविमूढधीः *a. m.* = He whose mind was perplexed on account of grief. वि+लपन् Present Participle = crying. द्यौः, दिवौ, दिवः *f* दिवं ययौ = स्वर्गं गतः = died

13. वसिष्ठः *m* = सूर्यवंशगुरुभूतः ब्रह्मर्षिः । वसिष्ठस्य उक्तिः तया=वसिष्ठोक्त्या *f* = as per directions of वसिष्ठ । आ+नाययामासुः = caused to be brought by messengers. Perfect of आनाययति ॥

14. गीः *f* = word. कैकेय्याः गीः *f*, तया = कैकेयीगिरा । Note that कैकेयी is also called कैकयी । चकार, चक्रतुः, चक्रुः perfect of कृ = कर् to do (परस्मैपदी) । संस्कारादि चकार=performed the cremation and other funeral ceremonies. विधिमनतिक्रम्य= यथाविधि *ind.* = as ordained by Sastras.

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।
वनायैव ययौ रामम् आनेतुं नागरैः सह ॥ १५

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।
ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह ॥ १६

चतुर्दश समा नीत्वा पुनरैष्याम्यहं पुरीम् ।
इत्युक्त्वा पादुके दत्वा तं रामः प्रत्ययापयत् ॥ १७

गृहीत्वा पादुके तस्मात् भरतो दीनमानसः ।
नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥ १८

---

15. अमात्यैः = By ministers. चोद्यमानः *a. m.* = Pressed. नगरे भवाः = नागराः तैः = नागरैः along with citizens.

16. चित्रकूटे तिष्ठति इति = चित्रकूटस्थः staying in चित्रकूट । चीरजटाधर *a. m* = Wearing bark and matted hair. आदौ भवः = आद्यः । वसिष्ठः आद्यः येषां ते *a. m.* तैः = वसिष्ठाद्यैः = वसिष्ठप्रभृतिभिः ॥

17. समाः *f* = Years. चतुर्दश समाः नीत्वा = The Accusative case denotes the duration of time, आ + एष्यामि 2nd Future of इ to go. प्रति + अयापयत् = Caused to return. Causal form of अयात् ॥

18. दीनं मानसं यस्य सः = दीनमानसः with the mind dejected. ररक्ष Perf. of रक्ष् = to protect. वसुन्धरा *f* = earth. वसूनि धारयति इति = वसुन्धरा । (वसु *n* = mineral stores).

राघवस्तु गिरेस्तस्मात् गत्वाऽत्रिं समवन्दत ।
तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥ १९

उषित्वा तु निशामेकाम् आश्रमे तस्य राघवः ।
विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥ २०

॥ इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः ॥

## अथ आरण्यकाण्डः ॥

व्रजन् वनेन काकुत्स्थो विराधं विधिचोदितम् ।
सदारानुजमात्मानं हरन्तमवधीत तदा ॥ १

---

19. गिरिः *m* mountain सं+अवन्दत = saluted. स्वैः *a. m* = स्वीयैः of her own. अभूषयत् = adorned.

20. उषित्वा *ind.* = having dwelt. निशा *f* = night. आश्रम *m. n* = hermitage. विवेश Perfect of विश् to enter. विवेश, विविशतुः, विविशुः ॥

---

1. व्रजन् Pre. P. = गच्छन् । विधिना चोदितः तम = विधिचोदितम् = set up by fate. दाराः (always masculine and plural) = भार्या. दाराश्च अनुजश्च = दारानुजाः, दारानुजैः सह वर्तत इति सदारानुजः, तम् along with his wife and brother. अवधीत् Aorist of हन् = to kill. वध् is substituted for हन् in the Aorist.

शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः ।
प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ २

तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः ।
अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥ ३

रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा ।
ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥ ४

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥ ५

---

2. स्वर्गतिम् *f* = स्वर्गगमनम् । वीक्ष्य = दृष्ट्वा । प्रति+जज्ञे Perfect of जन्=to be born. प्रतिजज्ञे=promised. अर्थितः *adj*. = being requested.

3 ननाम Perfect of नम्=to salute. ननाम, नेमतुः, नेमुः । रघूणां (रघुषु वा) उत्तमः = रघूत्तमः = the best of Raghus.

4. विष्णोः इदं = वैष्णवं *n* = belonging to विष्णु । इन्द्रस्य इदं = ऐन्द्रम् *n* = belonging to इन्द्र । तूण्योः युगं *n* = तूणीयुगं = a pair of quivers. ब्रह्मणः इदं = ब्राह्मं *n*= belonging to ब्रह्मा । प्र+ददौ=gave away. कुम्भात् सम्भवः यस्य सः = कुम्भसम्भवः *a. m* = the pitcher-born sage, i. e., अगस्त्य.

5. विदेहानां राजा = वैदेहः । वैदेहस्य अपत्यं स्त्री = वैदेही, तस्याः । श्रत्+दधे = श्रद्दधे = trusted. Per. of धा (धत्ते) । पितुः वल्लभः, तम् = पितृवल्लभम् = friend of his father.

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् ।
पर्णशालामध्युवास सीतया सहितः सुखम् ॥ ६

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका ।
तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥ ७

राममेव ततो वव्रे कामार्ता कामसन्निभम् ।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ ८

लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका ।
सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥ ९

---

6. पञ्चानां वटानां समाहारः=पञ्चवटी *f.* The place having a collection of five वट trees. निर्मिता *a. f* constructed. पर्णशालामध्युवास—Note here the grammatical peculiarity.

7. अभ्येत्य *ind.* having reached. शूर्पाः इव नखाः यस्याः सा= शूर्पणखा *f.* अभिका *f* lustful. निरस्ता *f* being discarded. निर्+आ+अकरोत् rejected.

8. कामेन तुल्यः=कामसन्निभः, तम् equal to काम (मन्मथ). धिक्कृता being despised. अभि+अद्रवत् attacked. Imperfect of द्रु (द्रुव्) to run. रुषा *f* with anger.

9. श्रवणे च नासिका च एतेषां समाहारः=श्रवणनासिकम् *n.* कृत्तं श्रवणनासिकं यस्याः सा=कृत्तश्रवणनासिका *a. f* with ears and nose cut off. जनस्थानं *n* = राक्षसानां वासभूतः स्थलविशेषः. खरः *m* = विश्रवसः पुत्रः, रावणस्य भिन्नोदरभ्राता ॥

तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ ।
दूषणत्रिशिरोमुख्यैः यातुधानैः समन्वितः ॥ १०

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।
खरं सहानुगं संख्ये जघान लघुविक्रमः ॥ ११

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥ १२

तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा ।
मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् ॥ १३

---

10. आ+ययौ came. समन्वितः=सहितः. दूषणः *N. m*= खरस्य सेनापतिः । त्रिशिराः *N. m*=खरस्य मन्त्री ॥

11. अनुगच्छन्तीति अनुगाः (followers). अनुगैः सह वर्तते इति, तम् along with his followers. सङ्ख्ये *n* युद्धे । जघान Perfect of हन् to kill. जघान, जघ्नतुः, जघ्नुः. लघुः विक्रमः यस्य सः=लघुविक्रमः *m* he who can display valour easily. निधाय *ind.* having entrusted.

12. शोकेन समन्विता=शोकसमन्विता *f* having grief. आदितः *ind.* from the beginning.

13. तत्+श्रुत्वा=तच्छ्रुत्वा । कृता मतिः येन सः=कृतमतिः *a. m* having made up his mind. मारीचः= ताटकायाः पुत्रः । हर्तुम् to take away. अचोदयत् commanded.

सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत् ।
सा तु तं मृगमाहर्तुं भर्तारं समयाचत ॥ १४

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः ।
अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे ॥ १५

विव्याध च मृगं रामः स निजं रूपमास्थितः ।
हा सीते लक्ष्मणेत्येवं रुदन् प्राणान् समत्यजत् ॥ १६

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् ।
तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम् ॥ १७

---

14. **स्वर्णमृगः** *m* a golden deer. **प्रमुखे** *n* in front of. **आहर्तुं** to bring.

15. **नियुज्य** having directed. **अनु + अगच्छत्** followed. **तूर्णं** *ind.* quickly. **काननस्य अन्तरं** *n*, **तस्मिन् = काननान्तरे** in the interior of the forest. **द्रवन्तम्** running.

16. **विव्याध** Perfect of **व्यध्** to strike (**विध्यति**). **विव्याध, विव्यधतुः, विव्यधुः ।** **निजं रूपम् आस्थितः =** having resumed his natural form. **प्राणान्** life. **प्राणाः पुंसि च भूम्न्येव इत्यमरः ।** (always masculine plural). **सं + अत्यजत्** gave up.

17. **भृशं** *n* **चोदितः** violently pressed. **तद्रक्षां देवताः प्रार्थ्य** praying to Devatas to protect her. The root **अर्थ्** governs two objects i. e. **तद्रक्षाम्** and **देवताः ।** **अन्तिकं** *n* near.

तदन्तरं समासाद्य रावणो यतिरूपधृत ।
सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः ॥ १८

ततो जटायुरालोक्य नीयमानां तु जानकीम् ।
प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम् ॥ १९

छित्वैनं चन्द्रहासेन पातयित्वा च भूतले ।
गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम् ॥ २०

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।
रावणो रक्षितुं चैनां नियुयोज निशाचरीः ॥ २१

---

18. तदन्तरं *n* that opportunity. यतिरूपधृत् *a. m* having assumed the form of an ascetic. गगनम् *n* = आकाशम्. मुदा *f* with pleasure.

19 जनकस्य अपत्यं स्त्री = जानकी । प्र + अहरत् = प्राहरत् struck. तुण्डपक्षनखैः with beak, wings and nails. भृशं *ind.* severely.

20. छित्वा *ind.* having cut. चन्द्रहास *m* Ravana's sword. निजमन्दिरम् *n* स्वगृहम् । पातयित्वा *ind.* having made him fall.

21. आत्मजा daughter (आत्मजः son). नियुयोज commanded. निशाचरीः *f* = राक्षसीः । संस्थाप्य *ind.* having placed.

हत्वा रामस्तु मारीचम् आगच्छन्ननुजेरिताम् ।
वार्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत् ॥ २२

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे ।
सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः ॥ २३

तेनोक्तां जानकीवार्तां श्रुत्वा पश्चान्मृतं च तम् ।
दग्ध्वा सहानुजो रामः चक्रे तस्योदकक्रियाम् ॥ २४

आत्मनोऽभिभवं पश्चात् कुर्वतीं पथि लक्ष्मणः ।
अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् ॥ २५

---

22. अनुजेन ईरिता, ताम् = अनुजेरिताम् told by younger brother. वार्ता *f* news. दुःखार्तः *a m.* affected by grief. उप+आ+अगमत् returned.

23. विचिन्वानः *a. m* searching for. वनान्तरे *n* in the interior of the forest गृध्राणां राजा = गृध्रराजः, तम्, the king of vultures. राजन् is changed to अकारान्त at the end of a तत्पुरुष compound. छिन्नपक्षः with wings cut off. ददर्श Perfect of दृश्. ददर्श, ददृशतुः, ददृशुः ॥

24. दग्ध्वा *ind.* having cremated. चक्रे Perfect of कृ = कर् to do (आत्मनेपदी). चक्रे, चक्राते, चक्रिरे. उदकक्रिया *f* libation of water.

25. अभिभवः = अवमानः । अयोमुखी *N.* a Rakshasi. पथि *m* on the way. आशु *ind.* at once.

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ।
ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ ॥ २६

स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये ।
सुग्रीवमृष्यमूकस्थं याहीत्युक्त्वा दिवं ययौ ॥ २७

ततः प्रीतो रघुश्रेष्ठः शबर्याश्रममभ्ययात् ।
तयाऽभिपूजितः पश्चात् पम्पां प्राप सलक्ष्मणः ॥ २८

॥ इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः ॥

---

26. नि+अकृन्तताम् Imperfect of कृत्—कृन्त् to cut. ददाह, देहतुः, देहुः Perfect of दह् to burn.

27. दिव्या आकृतिः यस्य सः=दिव्याकृतिः *a. m.* he who has assumed a divine form. सीतायाः उपलब्धिः *f*, तस्यै=for finding out सीता । ऋष्यमूकः=दण्डकारण्यस्थः सुग्रीवावासभूतः पर्वतविशेषः । याहि Imperative second person singular of या to go.

28. अभि+अयात् went to. पम्पा name of a lake in दण्डकारण्य ॥

# अथ किष्किन्धाकाण्डः ॥

हनूमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ ।
प्राप्य श्रुत्वा तु वृत्तान्तं तेन तौ समयोजयत् ॥ १

ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः ।
सख्यं च कारयामास तयोः पावकसन्निधौ ॥ २

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् ।
दर्शयिष्यामि वैदेहीम् इत्यन्येन च संश्रुतम् ॥ ३

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम् ।
निवेदितमशेषं च बलाधिक्यं च तस्य तत् ॥ ४

---

1. निर्दिष्टः directed. तेन तौ समयोजयत् he brought them to him.

2. सख्यं *n* friendship. निवेद्य having told. कारयामास Perfect of कारयति । पावकसन्निधौ in the presence of God of fire.

3. दर्शयिष्यामि Second future of दर्शयति. संश्रुतम् *a.n.* = प्रतिज्ञातम् । प्रतिजज्ञे *A.* promised.

4. अशेषम् *n* entirely. बलाधिक्यं *n* superiority of strength. वैरं *n* enmity.

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् ।
सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः ॥ ५

पुनश्च दर्शितांस्तेन सालान् सप्त रघूत्तमः ।
बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया ॥ ६

किष्किन्धां प्राप्य सुग्रीवः ततो रामसमन्वितः ।
जगर्जातीव संहृष्टः कोपयन् वानराधिपम् ॥ ७

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद्भृशम् ।
सोऽपि संभग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम् ॥ ८

कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।
रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः ॥ ९

---

5. दुन्दुभि is a राक्षस having the form of a महिष। He is मन्दोदरी's brother. काय *m* body. प्रेषयामास threw away. पादांगुष्ठ *m* toe.

C. सालः=वृक्षविशेषः. दर्शित showd. चिच्छेद cut. अनुशङ्का *f* doubt.

7. जगर्ज Perf. of गर्ज् to roar. अतीव *ind.* very much. संहृष्टः *a. m.* सन्तुष्टः.

8. निष्क्रम्य *ind.* having come out. समरे *m*=युद्धे। सम्भग्नसर्वाङ्गः wounded all over the body. प्र+अद्रवत्=ran up.

9. कृतचिह्नः-Rama could not distinguish between वाली and सुग्रीव and the latter was given a

हेममाली ततो वाली तारयाऽभिहितं हितम् ।
निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् ॥ १०

बाणेन वालिनं रामो विध्वा भूमौ न्यपातयत् ।
सोऽपि राम इति ज्ञात्वा देहं त्यक्त्वा दिवं ययौ ॥ ११

पश्चात् तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः ।
वानराणामधिपतिं चकाराश्रितवत्सलः ॥ १२

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः ।
उवास चतुरो मासान् सीताविरहदुःखितः ॥ १३

---

demarkating badge by Rama. आ+अह्वयत Imperfect of ह्वे—ह्वय् to call. ह्वय् with आ is आत्मनेपदी when it means "to call out for battle". तस्थौ = stood. तस्थौ, तस्थतुः. तस्थुः, तिरोहितः *a m.* hiding himself. क्षिप्रं *ind.* soon.

10. हेममाला अस्य अस्तीति = हेममाली *a. m.* having a golden neck-lace. अभिहितं *n* said. हितं *n* welfare. निरस्य *ind.* having discarded. सुदारुणम् *a. m* = अतिभयङ्करम् fierce.

11. नि+अपातयत् made him fall. विध्वा *ind.* having struck.

12. समाश्वास्य *ind.* having consoled. पश्चात्तपन्तं Pre. Part. = repenting.

13. माल्यवान् *m* name of a mountain. चतुरो मासान्

अथ रामस्य निर्देशात् लक्ष्मणो वानराधिपम् ।
आनयत् प्लवगैः सार्धं हनुमत्प्रमुखैर्गिरिम् ॥ १४

सुग्रीवो राघवं दृष्ट्वा वचनात् तस्य वानरान् ।
न्ययुङ्क्त सीतामन्वेष्टुम् आशासु चतसृष्वपि ॥ १५

ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम् ।
विश्वासाय तु वैदेह्याः तद्गृहीत्वा स निर्ययौ ॥ १६

ततो हनूमत्प्रमुखा वानरा दक्षिणां दिशम् ।
गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन् ॥ १७

---

the Accusative case denotes the duration of time. विरह *m* separation.

14. रामस्य निर्देशात् by Rama's command. आनयत् brought. प्लवगाः monkeys.

15. नि+अयुङ्क्त Imperfect of युज् to command. न्ययुङ्क्त, न्ययुञ्जातां, न्ययुञ्जत । आशासु *f* = दिक्षु । चतसृष्वपि आशासु in the four directions.

16. हनूमान् is also called हनुमान् । अङ्गुलीयकं finger-ring. पाणिः *m* hand.

17. हनूमत्प्रमुखाः *a m.* headed by हनूमान् । विचिन्वन्तः searching for आप्नुवन् obtained.
आप्नोत्, आप्नुताम्, आप्नुवन् ॥

समयातिक्रमात् तत्र चक्रुः प्रायोपवेशनम् ।
तेऽत्र सम्पातिना प्रोक्तां सीतावार्तां च शुश्रुवुः ॥ १८

ततः प्रापुरुदन्वन्तम् अङ्गदाद्याः प्लवङ्गमाः ।
तं विलङ्घयितुं तेषां न कश्चिदभवत् क्षमः ॥ १९

स्वप्रभावप्रशंसाभिः तदा जाम्बवदुक्तिभिः ।
संवर्धितो महेन्द्राद्रिम् आरुरोहानिलात्मजः ॥ २०

॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः ॥

---

18. समयातिक्रमात् as the prescribed period elapsed. प्रायोपवेशनं *n* hunger strike. सम्पाती *m* = गृध्रराजः, जटायुषः ज्येष्ठः भ्राता । शुश्रुवुः Perfect of श्रु to hear (शृणोति) । शुश्राव, शुश्रुवतुः, शुश्रुवुः ॥

19. प्र+आपुः Perfect of आप् to obtain. प्राप, प्रापतुः, प्रापुः । उदन्वान् *m* = समुद्रः । अङ्गदः = वालिपुत्रः । प्लवगः, प्लवङ्गः, प्लवङ्गमः a monkey. विलङ्घयितुं *ind.* to cross. क्षमः = समर्थः, capable.

20. स्वप्रभावप्रशंसाभिः *f* praising his capacities. संवर्धितः roused. आ+रुरोह ascended. उक्तिः *f* word. अद्रि *m* mountain. अनिलात्मजः = वायुपुत्रः, i. e., हनूमान् ॥

## अथ सुन्दरकाण्डः ॥

अभिवाद्याथ सकलान् अमरान् पवनात्मजः ।
पुप्लुवे च गिरेस्तस्मात् विलङ्घयितुमर्णवम् ॥ १

स समुल्लङ्घ्य मैनाकं सुरसामभिवाद्य च ।
निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः ॥ २

लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।
सीतां विचिन्वन्नद्राक्षीत् निद्राणं निशि रावणम् ॥ ३

अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥ ४

---

1. अभिवाद्य *ind.* = नमस्कृत्य । अमराः = देवाः । पवनात्मजः = हनूमान् । पुप्लुवे Perfect of प्लु to jump. अर्णवः = समुद्रः । विलङ्घयितुं *ind.* to cross.

2. मैनाक a mountain in the ocean. सुरसा = नागमाता । सिंहिका = a Rakshasi. नीत्या *f* by policy. पार *n* the other bank. महोदधि *m* mighty ocean.

3. लङ्काधिदेवता the diety presiding over Lanka. अद्राक्षीत् Aorist of दृश् = पश्य् to see. निद्राणं *m* sleeping.

4. अपश्यन्+तत्र = अपश्यंस्तत्र । ततस्ततः also इतस्ततः = hither and thither. खिन्ना *f* afflicted with grief.

पादपं कश्चिदारुह्य तत्पलाशैः सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ ५

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः ।
भार्या भव ममेत्येवं बहुधा समयाचत ॥ ६

अहं त्वदनुगा न स्याम् इत्येषा तं निराकरोत् ।
काममन्युपरीतात्मा रावणोऽथ गृहं ययौ ॥ ७

गते तु रावणे सीतां प्रलपन्तीं स मारुतिः ।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥ ८

---

5. पादप *m* a tree. पलाश *n* a leaf. सुसंवृतः *a. m.* being concealed. आस्ते Present tense of आस् to sit. आस्ते, आसाते, आसते । आस्ते स्म sat. मारुतिः = हनूमान् । तर्कयन् *a. m.* guessing.

6. मैथिली = सीता । मदनार्दितः *a. m.* afflicted with love. बहुधा *ind.* in various ways.

7. अनुगा *a. f.* a follower. स्याम् Potential of अस् to be. स्यां, स्याव, स्याम । निराकरोत् rejected. काममन्युपरीतात्मा *a. m.* overcome by lust and anger.

8. रावणे तु गते (सति) Locative absolute = after रावण had gone. प्रलपन्ती mourning.

तत समादाय वैदेही विलप्य च भृशं पुनः ।
चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम् ॥ ९
मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनाम् आश्वास्य स विनिर्ययौ ॥ १०
नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत् ।
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥ ११
ततः शक्रजिता युद्धे बद्धः पवननन्दनः ।
प्रतापं रघुनाथस्य रावणाय न्यवेदयत ॥ १२
रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः ।
दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ॥ १३

---

9. सं+आ+दत्वा=समादाय । वि+लपित्वा=विलप्य । चूडामणिः *m*=शिरोऽलङ्कारभूतः आभरणविशेषः crest jewel.

10. मा विषादं कृथाः do not dejected. अ of the Aorist is dropped on account of the Prohibitive particle मा. अकृथाः Aorist 2nd person. अकृथाः, अकृषाथां, अकृढ्वम् । नेष्यति 2nd Future of नी=नय् to lead.

11. नीतिः अस्य अस्तीति=नीतिमान् skilled in politics. सञ्चिन्त्य *ind.* after deep consideration. बभञ्ज Perf. of भञ्ज् to destroy. उपवन *n* a garden.

12. शक्रजिता by इन्द्रजित् । प्रतापः valour.

13. रक्षः *n* a demon. दीपित *a* set fire to. लाङ्गूल *n* tail. अशेषतः *ind.* entirely. उत्तीर्य *ind.* after crossing the ocean.

स गत्वा वानरैः साकं राघवायात्मना कृतम् ।
निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥ १४

॥ इति श्रीरामोदन्ते सुन्दरकाण्डः समाप्तः ॥

## अथ युद्धकाण्डः ॥

अथासङ्ख्यैः कपिगणैः सुग्रीवप्रमुखैः सह ।
निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः ॥ १

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत् ।
लङ्काधिपत्येऽभ्यषिञ्चत् एनं रामोऽरिमर्दनः ॥ २

उक्तमार्गः समुद्रेण तत्र सेतुं नलेन सः ।
कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ॥ ३

14. नि+वेदयित्वा this is an archaic form (आर्षप्रयोगः). The correct form is निवेद्य. आत्मना कृतं done by himself.

1. असङ्ख्य *a* innumerable. सुग्रीवप्रमुखैः कपिगणैः सह with monkeys headed by सुग्रीव ॥
2. त्यक्तः forsaken. अभि+असिञ्चत् । अभ्यषिञ्चत् crowned. अरिमर्दनः *a* destroyer of foes.
3. उक्तः मार्गः यस्मै सः = उक्तमार्गः he to whom way was pointed out. सेतुः *m* a bund. नल Name of a monkey. सुवेलं *m* is a mountain in लङ्का ॥

ततो राघवनिर्दिष्टाः नीलमुख्याः प्लवङ्गमाः ।
रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः ॥ ४

रावणस्य नियोगेन निर्गतान् युधि राक्षसान् ।
प्रहस्तप्रमुखान् हत्वा नेदुस्ते सिंहविक्रमाः ॥ ५

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ ।
राक्षसान् सुबहून् युद्धे जघ्नुर्भीमपराक्रमाः ॥ ६

रावणिस्तु ततोऽभ्येत्य समरे रामलक्ष्मणौ ।
ननाह नागपाशेन नागारिस्तौ व्यमोचयत् ॥ ७

---

4. नीलमुख्याः = नीलप्रमुखाः । रुरुधुः Perf. of रुध् to beseige रुरोध, रुरुधतुः, रुरुधुः । वृक्षपाषाणपाणयः *a. m.* holding trees and stones in their hands.

5. नियोग *a* command. युधि *f* = युद्धे । प्रहस्तः = रावणस्य मातुलः, सुमालिनः पुत्रः । नेदुः Perf. of नद् to roar. ननाद, नेदतुः, नेदुः । सिंहविक्रमाः *a. m.* those who resembled lions in valour.

6. जघ्नुः Perf. of हन् to kill. जघान, जघ्नतुः, जघ्नुः । भीमविक्रमाः *a. m.* those who possess fierce valour.

7. रावणस्य अपत्यं पुमान् = रावणिः Ravana's son i. e. इन्द्रजित् । समरे *m. n.* युद्धे । ननाह Perf. of नह् to bind. ननाह, नेहतुः, नेहुः । नागपाशः = सर्पास्त्रम् । नागानाम् अरिः = नागारिः the enemy of serpents i. e. गरुडः । वि + अमोचयत् released.

रावणोऽपि ततो युद्धे राघवेण पराजितः ।
कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ॥ ८

ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम् ।
ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् ॥ ९

ततो रावणसंदिष्टौ देवान्तकनरान्तकौ ।
हनूमदङ्गदाभ्यां तु निहतौ रणमूर्धनि ॥ १०

अथातिकायमायान्तं रथमारुह्य वाहिनीम् ।
अर्दयन्तं महाकायं लक्ष्मणश्चावधीच्छरैः ॥ ११

---

8. पराजितः *a. m.* defeated. प्रबोध्य *ind.* having awakened. आशु *ind.* at once.

9. निशाचरः=राक्षसः । सङ्घ *m* group.

10. देवान्तक and नरान्तक are two sons of Ravana born to a गन्धर्वी । रणमूर्धनि *m* in the brunt of battle.

11. अतिकाय is Ravana's son born to a Rakshasi called धान्यमालिनी । वाहिनी *f*=An army. अर्दयन्तं *a. m.* destroying. महान् कायः यस्य सः= महाकायः huge-bodied.

ततो रावणसंदिष्टः शक्रजिद्राघवौ रणे ।
ब्रह्मास्त्रेण च तौ बध्वा वानरांश्चावधीच्छरैः ॥ १२

अथ जाम्बवतो वाक्यात् गत्वा चौषधिपर्वतम् ।
मारुतिश्चौषधीस्तत्राहृष्ट्वा कोपं चकार सः ॥ १३

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः ।
तासां गन्धेन वै सर्वान् राघवादीनजीवयत् ॥ १४

रावणः कपिभिर्दग्धां पुरीं वीक्ष्य रुषाऽन्वितः ।
न्ययुङ्क्त कुम्भकर्णस्य पुत्रौ हन्तुं च राघवौ ॥ १५

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ ।
कुम्भं रामोऽवधीद्बाणैः निकुम्भं चात्मजो रवेः ॥ १६

---

12. सन्दिष्टः *a.m.* commanded. वानरान्+च=वानरांश्च ॥

13. ओषधिपर्वतः mountain of herbs. न दृष्ट्वा=अदृष्ट्वा ॥

14. भूधर *m* a mountain. समुत्पाट्य *ind.* having uprooted. अजीवयत brought to life.

15. पुरीं *f*=नगरीम् । वीक्ष्य *ind.*=दृष्ट्वा ॥

16. कुम्भ and निकुम्भ are the sons of कुम्भकर्ण ।
रवेः आत्मजः son of the Sun i. e. सुग्रीवः ॥

ततः खरात्मजं तेन रावणेन प्रचोदितम् ।
पीडयन्तं कपीन् बाणैः जघानास्त्रेण राघवः ॥ १७
ततः संतप्तहृदयो रावणो युद्धदुर्मदम् ।
प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ ॥ १८
नगरान्निर्ययौ तूर्णम् इन्द्रजित् समितिंजयः ।
मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै ॥ १९
वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च ।
जघान सीतां खड्गेन शितेन समितिंजयः ॥ २०
युद्धं त्यक्त्वा ततः सर्वैः वानरैः स परीवृतः ।
दुःखितो हनुमांस्तत्र यत्र रामोऽव्रजल्लघु ॥ २१

---

17. **खरस्य आत्मजः, तम् = खरात्मजम्** the son of **खर**। **प्रचोदित** *a. m.* sent.

18. **युद्धे दुर्मदः = युद्धदुर्मदः** unconquerable in battle. **प्रचोदयामास** directed. **सन्तप्तहृदयः** one whose heart is afflicted. **तूर्णं** *ind.* quickly.

19. **समितिंजयः** *a. m.* he who has won in several battles. **मायासीता** illusory Sita.
**मोहनाय** *a* to create confusion.

20. **वानरेषु पश्यत्सु (सत्सु)** Locative absolute, when **वानर**s were looking on. **शित** *a* sharp.
**समितिः** *f* - **युद्धम** ॥

21. **परीवृतः** (also **परिवृतः**) surrounded by.
**अव्रजत्** went. **लघु** *ind.* = **क्षिप्रम्** quickly.
**(लघु क्षिप्रमरं द्रुतं इत्यमरः).**

उपगम्याब्रवीद्रामं हनूमान् निखिलं तदा ।
श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप सः ॥ २२

विभीषणोऽथ संप्राप्य दृष्ट्वा रामं च मूर्छितम् ।
विषण्णान् वानरान् वाचा सान्त्वयन्निदमब्रवीत् ॥ २३

मिथ्या विषादं संत्यज्य जगन्नायक हे प्रभो ।
शृणु मेऽभिहितं वाक्यं ज्ञात्वा रावणिमानसम् ॥ २४

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै ।
निकुम्भिलायां होमं तु कर्तुं तेनाधुना किल ॥ २५

---

22. उप+गत्वा = उपगम्य *ind* (also उपगत्य) अब्रवीत् told. अब्रवीत्, अब्रूतां, अब्रुवन् । निखिलं, अखिलं *a* = सर्वम् । मोहम् अवाप fell into a swoon.

23. मूर्छित *a* swooned. विषण्ण *a. m.* dejected. सान्त्वयन् consoling.

24. मिथ्या *ind.* false, groundless. शृणु Imperative of श्रु to hear. रावणिमानसम् *n* mentality of Ravana's son i. e. इन्द्रजित् । अभिहितं *a* what is told.

25. दुरात्मा *a. m.* wicked-hearted. निकुम्भिला *f* = लङ्कास्थः स्थलविशेषः, तस्याः भद्रकाली च । अधुना *ind.* now.

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा ।
कृते होमे तत्र रिपुः अजेयो भवति ध्रुवम् ॥ २६

उवाच रामः सौमित्रिं राक्षसेन्द्रसुतं जहि ।
गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन सः ॥ २७

लक्ष्मणस्तु तदा रामम् आमन्त्र्य सविभीषणः ।
निकुम्भिलां प्राप तूर्णम् इन्द्रजिद्यत्र वर्तते ॥ २८

अदर्शयद्भ्रातृपुत्रं धर्मात्मा स विभीषणः ।
लक्ष्मणो भेदयामास राक्षसाञ्छरसञ्चयैः ॥ २९

कृत्वा चिरं तत्र युद्धम् ऐन्द्रेणास्त्रेण वै रुषा ।
शिरश्चिच्छेद सौमित्रिः दशाननसुतस्य हि ॥ ३०

---

26. प्रेषय Imperative of प्र+इष् to send. होमे कृते (सति) Locative absolute. When होम was performed. ध्रुवम् *ind.* certainly.
अजेयः unconquerable.

27. सुमित्रायाः अपत्यं पुमान्=सौमित्रिः, लक्ष्मणः । राक्षसेन्द्र-सुतं=इन्द्रजितम् । जहि Imperative 2nd person singular of हन् to kill. सुहृत् *m* a friend.

28. आमन्त्र्य *ind.* taking leave of.

29. भेदयामास struck. अदर्शयत् showed.
शरसञ्चयाः groups of arrows.

30. चिच्छेद Perfect of छिद् to cut.
चिच्छेद, चिच्छिदतुः, चिच्छिदुः ॥

स सुतस्य वधं श्रुत्वा रावणः शोककर्शितः ।
नष्टधैर्यो विह्वलाङ्गो विललापाकुलेन्द्रियः ॥ ३१

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम् ।
येनाहमद्य पश्यामि हतमिन्द्रजितं रणे ॥ ३२

क्व गतोऽसि हतः शूर! मानुषेण पदातिना ।
राज्याद् भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र! जीवितम् ॥ ३३

इन्द्रं जित्वा तु तं बध्वा लङ्कामानीय वै बलात् ।
अकरोस्त्वं प्रतापेन कारागृहनिवासिनम् ॥ ३४

---

31. शोककर्शितः *a. m.* dejected on account of grief. विह्वलाङ्गः *a. m.* he whose limbs are fainting विललाप (Perfect) wept. विललाप, विलेपतुः, विलेपुः । आकुलेन्द्रियः *a. m.* one whose senses are agitated.

32. निरर्थकं *a. n.* useless. जल्पितं words.

33. पदाति *m* a foot soldier. दीन *a. m.* insignificant. मानुषः *m* mortal.

34. बलात् forcibly. अकरोः Imperfect of कृ=कर् to do. अकरोः, अकुरुतं, अकुरुत । कारागृहम् *n* prison. प्रतापेन by valour.

मोचयामास ब्रह्मा त्वां सान्त्वयित्वाऽमराधिपम् ।
तादृक् त्वं कुत्र मां त्यक्त्वा गतोऽद्य सुदुरासदः ॥ ३५

किं करिष्याम्यहं पुत्र! क गच्छामि वदाधुना ।
नय मां यत्र गन्तासि तत्र ते न विलम्बनम् ॥ ३६

लोकेषु त्वत्समो नास्ति तादृशस्य पिताऽस्म्यहम् ।
इत्याशया स्थितं पुत्र गर्वितेन मयाऽत्र हि ॥ ३७

धूम्राक्षो वज्रदंष्ट्रश्च कुम्भकर्णः प्रतापवान् ।
राक्षसा निहताः सर्वे प्रहस्तप्रमुखा अपि ॥ ३८

---

35. मोचयामास released. अमराधिपम्=इन्द्रम् । तादृक् *m* (or तादृशः) of such antecedents. सुदुरासदः impossible to be approached. Prose-order—ब्रह्मा त्वां सान्त्वयित्वा अमराधिपं मोचयामास ॥

36. गन्तासि 1st Future (लुट्) of गम्=गच्छ् to go. गन्ता, गन्तारौ, गन्तारः । तत्र ते विलम्बनं न (भवतु) let there be no delay on your part.

37. आशया *f* with such hopes. गर्वितः *a* proud.

38. वज्रे इव दंष्ट्रे यस्य सः=वज्रदंष्ट्रः name of a राक्षस । धूम्रे अक्षिणी यस्य सः=धूम्राक्षः name of a राक्षस । अक्षि becomes अक्ष at the end of a तत्पुरुष compound.

अनादृत्य तु तान् सर्वान् राक्षसान् प्रहृतानपि ।
अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव ॥ ३९

इत्येवं बहुधा तत्र विलप्य स तु रावणः ।
अन्तर्नियम्य दुःखानि कोपं चक्रे सुदारुणम् ॥ ४०

रथं सूत! ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः ।
रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात् ॥ ४१

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् ।
रामेण सह सङ्गम्य युद्धं चक्रे सुदारुणम् ॥ ४२

---

39. अनादृत्य *ind.* having disregarded. तव बलं अवष्टभ्य relying on your strength. सुखेन अवस्थितं (मया) I have been at ease.

40. इत्येवं in this manner. अन्तर्नियम्य दुःखानि suppressing agony within. बहुधा *ind.* in various ways.

41. रथं मम अग्रे कुरु bring the car before me. जयैषी *a. m.* he who is anxious to win. निर्+गमिष्यामि 2nd Future (लृट्) of गम्=गच्छ् to go.

42. सारथिवाहितम् brought by charioteer. सं+गत्वा=सङ्गम्य *ind.* having joined. सुदारुणं *a. n.* most dreadful.

ततो मातलिनाऽनीतं रथमैन्द्रं समारुहन् ।
रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः ॥ ४३

चकार युद्धं तुमुलं देववृन्दे च पश्यति ।
सीताहरणजात कोपाद्रामो धर्मभृतां वरः ॥ ४४

अथागस्त्यस्य वचनात् रावणं लोककण्टकम् ।
जघान रामो लक्ष्मीवान् ब्राह्मेणास्त्रेण तं रणे ॥ ४५

मन्दोदरी वधं श्रुत्वा भर्तुः प्रियतरस्य सा ।
विललाप रणं गत्वा कुररीव भृशातुरा ॥ ४६

विभीषणोऽथ रामेण सन्दिष्टः सह राक्षसैः ।
चकार दहनं तस्य रावणस्य गतायुषः ॥ ४७

---

43. मातलि name of the charioteer of इन्द्र । सं+आ+रुहन्=समारुहन; समारोहन् is the correct form. उदयस्थो यथा रविः like the rising sun. रराज Perfect of राज् to shine.

44. तुमुलं *a. n.* dreadful. देववृन्दे पश्यति (सति) Locative absolute. धर्मभृतां वरः the best of virtuous.

45. लोककण्टकः enemy of all worlds. लक्ष्मीवान् *a.m.* illustrious.

46. कुररी a female osprey (a kind of bird). भृशातुरा *f* much afflicted with grief.

47. गतायुषः *a. m.* deceased. सन्दिष्टः *a* advised.

अथाग्निवचनात् सीतां रामो वीक्ष्य सुनिर्मलाम् ।
सन्दिष्टो देववृन्दैश्च जग्राह पितृसन्निधौ ॥ ४८

तवैव युक्तं कर्मैतत् सर्वलोकभयङ्करम् ।
तद्वैदेह्याः कृते राम! सा तु लक्ष्मीर्भवान् स्वभूः ॥ ४९

इत्येवं देवसङ्घैश्च मुनिभिश्चाभिपूजितः ।
लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ ॥ ५०

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः ।
कारयामास लक्ष्मीवान् अनुजेनाभिषेचनम् ॥ ५१

ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः ।
भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः ॥ ५२

---

48. अग्निवचनात् *n* from the words of God Fire. सुनिर्मला *a. f.* highly chaste. जग्राह Perfect of ग्रह् to take. जग्राह, जगृहतुः, जगृहुः ॥

49. वैदेह्याः कृते for the sake of सीता । स्वभूः the self-born God i. e. Lord Vishnu.

50. तुतोष Perfect of तुष् to be pleased. तुतोष, तुतुषतुः, तुतुषुः । विश्वासम् आययौ believed it. अभिपूजितः *a* honoured.

51. सत्यसन्धः one who is true to his words. उदारधीः *a. m.* generous minded.

52. जगत्पतिः *m* the lord of the world. मित्र *n* friend.

किष्किन्धानिलयाः सर्वाः कपीनां योषितः प्रियाः ।
सीताकुतूहलात् पुष्पं विमानं ताः समारुहन् ॥ ५३

अथ दाशरथिः श्रीमान् भरतं द्रष्टुमिच्छया ।
भरद्वाजाश्रमं प्राप्तः तत्र तेन निवारितः ॥ ५४

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम् ।
रामस्यादर्शनाद्वह्निप्रवेशं कांक्षतो भृशम् ॥ ५५

तत्र तेन मुनीन्द्रेण सानुजः ससुहृद्गणः ।
सन्तोषविवशेनाथ रामोऽपि विधिपूजितः ॥ ५६

रामोऽथ सह संगम्य भरतेनारिघातिना ।
अयोध्यां प्राविशत् तूर्णं मातृभिश्चाभिनन्दितः ॥ ५७

---

53. **किष्किन्धानिलयाः** *a. f.* residing at **किष्किन्धा** । **योषितः** *f* ladies. **सीताकुतूहलात्** *n* curious to see Sita. **पुष्पं विमानं=पुष्पकमित्यर्थः** । **समारुहन्** ascended.

54. **निवारितः** detained.

55. **वह्निप्रवेशं काङ्क्षतः** eager to enter the fire.

56. **विधिना पूजितः=विधिपूजितः** entertained with due respect to customs. **सन्तोषविवशेन** with overflowing joy.

57. **अरिघाती** *m* destroyer of enemies. **प्र+अविशत् =प्राविशत्** entered. **अभिनन्दितः** welcomed.

अथायोध्यानिवासास्ते जनाः सर्वेऽपि तोषिताः ।
अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम् ॥ ५८

चातकास्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून् ।
आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ ५९

अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्विताः ।
सहिता मन्त्रिभिश्चक्रुः वसवो वासवं यथा ॥ ६०

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।
यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ६१

---

58. अयोध्या निवासः येषां ते = अयोध्यानिवासाः *a. m.* residents of अयोध्या । धन्याः those who have achieved their objects. द्रुतं *ind.* quickly. तोषिताः *a* pleased.

59. घनाः *m* clouds. चातकाः *m* Chataka birds. मयूराः *m* peacocks. तोषः *m* joy.

60 अभिषेक *m* Coronation. मुदा *f* = सन्तोषेण । अन्विताः *a.m.* = युक्ताः । वासवः = इन्द्रः । वसवः = अष्ट वसवः —

धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः ॥

61. यथार्हं *ind.* according to their status. स्रक्-गन्ध-अम्बर-भूषणैः with garlands, scents, clothes and ornaments.

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम् ।
पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ६२

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला ।
भूषणैर्भूषयामास वस्त्रचन्दनकुङ्कुमैः ॥ ६३

रामाज्ञयाऽथ सर्वेऽपि सुग्रीवादिप्लवङ्गमाः ।
किष्किन्धां लेभिरे कृच्छ्रात् श्रीरामविरहातुराः ॥ ६४

अतिभक्तो दीर्घजीवी लङ्कासमरसाधकः ।
अनुज्ञातः स रामेण लङ्कां प्रायाद्विभीषणः ॥ ६५

पितुस्सिंहासनं प्राप्य भ्रातृभिस्सहितोऽनघः ।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६६

---

62. विशिष्य *ind.* in particular. मुक्ताहार *m* garland of pearls. मुदम् *f* pleasure.

63. पुत्रवत्सला *a. f.* affectionate towards the son. वस्त्रचन्दन-कुङ्कुमैः with clothes, scents and saffron.

64. कृच्छ्रात् with difficulty. श्रीरामविरहातुराः sorry for separation from Rama.

65. दीर्घजीवी *m* = चिरजीवी । अनुज्ञातः permitted. प्र+अयात् Imperfect of या to go.
प्रायात्, प्रायातां, प्रायुः—प्रायान् ॥

66. सिंहासनं *n* throne. अनघः faultless. वि+रराज. Perfect of राज् to shine. त्रिविष्टपं *n* = स्वर्गः ॥

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।
भरतायाप्रमेयाय प्राणात् प्रियतराय सः ॥ ६७

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः ।
खे सतारो यथा चन्द्रः तथा रेजुः स्वपत्तने ॥ ६८

॥ इति श्रीरामोदन्ते युद्धकाण्डः समाप्तः ॥

---

## अथ उत्तरकाण्डः ॥

---

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम् ।
इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम् ॥ १

---

67. लक्ष्मणानुमतेः+रामः = लक्ष्मणानुमते रामः ।
Note: When one र is preceeded by another the preceeding र disappears (सन्धिः) । **यौवराज्यं** the rank of heir apparent. **अप्रमेय** *a. m.* immeasurably great.

68. ताराभिः सह वर्तत इति = सतारः = सनक्षत्रः । **खे** *n* = आकाशे । **स्वपत्तने** *n* = स्वनगरे ॥

---

1. **परि+अग्रहीत्** Aorist of **ग्रह्** to take. **अज्ञजनवादेन** *m.* on account of the scandal by the ignorant. **तत्याज** Perfect of **त्यज्** to forsake.

तद्विदित्वाऽथ वाल्मीकिः आनीयैनां निजाश्रमम् ।
अन्तर्वर्त्नीं समाश्वास्य तत्रैवावासयत् सुखम् ॥ २

ऋषिभिः प्रार्थितस्याथ राघवस्य नियोगतः ।
शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत् ॥ ३

रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति ।
आनीय ससुतां सीतां तस्मै प्राचेतसो ददौ ॥ ४

शङ्क्यमाना पुनश्चैवं रामेण जनकात्मजा ।
भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा ॥ ५

---

2. विदित्वा *ind.* = ज्ञात्वा । अन्तर्वत्नी = गर्भिणी pregnant woman. समाश्वास्य *ind.* having consoled. अवासयत् causal Imperfect of वस् to dwell.

3. नियोगतः *ind.* by order. लवणः = कश्चित् राक्षसः, विश्रवसः दौहित्रः । अपालयत् protected.

4. हेममयी *f* = सुवर्णमयी made of gold. रामे यज्ञं वितन्वति (सति) Locative absolute. When Rama was performing a sacrifice. प्राचेतसः *m* = वाल्मीकिः । सुताभ्यां सह वर्तते इति ससुता with two sons.

5. शङ्क्यमाना *f* being suspected. विवरं hole or opening. प्र+विवेश entered.

अथ रामस्य निर्देशात् पौरैः सह वनौकसः ।
निमज्ज्य सरयूतीर्थे देहं त्यक्त्वा दिवं ययुः ॥ ६

ततो भरतशत्रुघ्नौ निजं रूपमवापतुः ।
रामोऽपि मानुषं देहं त्यक्त्वा धामाविशत् स्वकम् ॥ ७

श्रीरामोदन्तमाख्यातम् इदं मन्दधिया मया ।
समीक्ष्य निपुणैस्साद्भिः संशोध्य परिगृह्यताम् ॥ ८

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः ॥ ९

॥ इति श्रीरामोदन्ते उत्तरकाण्डः समाप्तः ॥

॥ इति श्रीरामोदन्तं समाप्तम् ॥

---

6. पुरे भवाः=पौराः citizens. वनम् ओकः येषां ते = वनौकसः the resiaents of forest, i. e. monkeys.

7. निजं रूपं original form. अव+आपतुः Perfect of आप् to obtain. धाम *n* abode. स्वकं *n* स्वीयम् । अविशत् entered.

8. मन्दधीः *a. m.* having a dull intellect. परि+गृह्यताम् (Passive, Imperative of ग्रह् to take.

9. ररक्ष Perfect of रक्ष् to protect. वैकुण्ठः = विष्णुः । चिन्मयः embodiment of wisdom.

# MODEL QUESTIONS

## बालकाण्डे प्रश्नाः ॥

I. 1. श्रीपतेः वक्षः केन अङ्कितम् ?

2. तेभ्य एतान् परान् दत्वा—What are the boons granted by ब्रह्मा?

3. What are the wicked deeds of रावणः?

4. विष्णुः देवान् कथम् असान्त्वयत् ? How did Lord विष्णु console ब्रह्मा and देवा's?

5. वाली सुग्रीवः जाम्बवान् हनूमान् च केषां पुत्राः?

6. कविः श्रीरामं कथं वर्णयति?

7. विश्वामित्रः रामलक्ष्मणाभ्यां किं किम् उपादिशत् ?

8. श्रीरामः मुनेः यज्ञं कथम् अपालयत् ?

9. अहल्यायाः शापवृत्तान्तं कथयत ।

10. अयोध्याया श्रीरामः कथम् अवसत् ?

II. अन्तं विभक्तिं वचनं च वदत—

1) तपसा, 2) विधातारम्, 3) भूमौ, 4) पत्नौ, 5) तासु, 6) तेषाम् ॥

III. व्याकरणविशेषं वदत (G. P.)—

1) साकं देवगणैः । 3) ताम् अध्युवास ।
2) अर्दयति स्म । 4) नृपाय अदात् ॥

IV. विग्रहवाक्यं लिखत—

1) श्रीरामोदन्तम् 3) नैपुण्यम्
2) दैत्यारिः 4) मिथिलाधिपः ॥

V. अधोनिर्दिष्टानां धातवः लकाराश्च (tenses) के?

1) उवाच 2) लेभे 3) जायेरन् 4) अस्ति ॥

## अयोध्याकाण्डे प्रश्नाः ॥

I. 1. कैकेयी कौ वरौ अयाचत? कस्मात् कारणात् अयाचत?
2. रामं के के अन्वगच्छन्?
3. गुहः कस्य पुरस्य राजा? तत् पुरं कुत्र वर्तते?
4. भरतं के आनयन्? दशरथस्य देहं के रक्षितवन्तः?
5. यदा भरतः आगच्छत् तदा श्रीरामः कुत्र वसन् आसीत्?
6. भरतः कथं राज्यम् अरक्षत?
7. भूषणैः स्वैरभूषयत्—का? काम्?

II. अव्ययं नाम किम्? उदाहरणानि वदत ॥

III. विग्रहवाक्यं लिखत—
1) सत्यसङ्गरः 2) कैकेयीगिरा 3) द्विजः 4) सुमन्त्रोक्तम् ।

IV. सन्धिं वदत—
1) चकार+अस्य । 3) वसिष्ठ+उक्तिः ।
2) ततः+गत्वा । 4) चित्रकूटे+अवसत् ॥

V. क्रियारूपं लिखत—
1) ततार 2) उवास 3) अवन्दत 4) अनुजज्ञे ॥

## आरण्यकाण्डे प्रश्नाः ॥

I. 1. What did विराध do in the forest?
2. मुनयः श्रीरामं किं प्रार्थयन्त?
3. सीतामभ्यद्रवत् रुषा—का? केन कारणेन?
4. खरः कः? सः कुत्र वसति? सः किमर्थं कुपितः अभवत्?
5. रावणः सीतां हर्तुं किम् अकरोत्?
6. मारीचः कथं प्राणान् अत्यजत्?
7. कदा रावणः सीताम् अहरत्?
8. छिन्नपक्षं ददर्श सः—कः ददर्श? कस्य पक्षौ छिन्नौ? कुतः?
9. अयोमुखी का? तस्याः किं संवृत्तम्?
10. कबन्धः किम् अवदत्?

II. प्रथमश्लोके विराधस्य कति विशेषणानि वर्तन्ते? तानि कानि?

III. एकपदी कुरुत (Give one word for)—

1) अगस्त्यस्य आश्रमम्, 2) वैदेह्याः पालनाय, 3) तस्याः रक्षा।

IV. व्याकरणविशेषं लिखत (G. P.)—

1) गृध्रराजः, 2) प्राणान् समत्यजत्॥

V. विग्रहवाक्यं लिखत—

1) ऋष्यमूकस्थम् 2) छिन्नपक्षम् 3) सीतोपलंभ्धये 4) अनुजेरिता॥

## किष्किन्धाकाण्डे प्रश्नाः॥

I. 1. तेन तौ समयोजयत्—कः कौ केन समयोजयत्?
2. श्रीरामः सुग्रीवः च किं किं प्रतिजज्ञाते?
3. सुग्रीवस्य अनुशङ्का कीदृशी? सा कथं निरस्ता?
4. वालिसुग्रीवयोः युद्धं वर्णयत।
5. श्रीरामः हनुमतः हस्ते किं किमर्थं ददौ?
6. वानराः कुत्र प्रायोपवेशनम् अकुर्वन्?
7. हनूमान् कथं संवर्धितः अभवत्?

II. पूर्णक्रियापदं लिखत (Give the Finite verb for)—

1) गत्वा, 2) प्राप्य, 3) विध्वा, 4) दृष्ट्वा॥

III. विग्रहवाक्यं लिखत—

1) भ्रातृवैरस्य 3) सीतावार्ताम्
2) लक्ष्मणसंयुतः 4) जाम्बवदुक्तिभिः॥

IV. Use in sentences of your own:—

1) सार्धम्, 2) क्षिप्रम्, 3) अलम्, 4) सहितः॥

V. शब्दरूपं वदत (तत्तद्विभक्तीः केवलम्)—

1) शङ्कया, 2) उदन्वन्तम्, 3) हेममाली, 4) आशासु॥

## सुन्दरकाण्डे प्रश्नाः ॥

I. 1. हनूमान् समुद्रस्य उपरि किं किं चकार?
2. सीता कुत्र कथम् अवर्तत?
3. रावणः सीतां किमवदत्? रावणस्य कोपः कथमभवत्?
4. हनूमान् कथं सीताम् आश्वासयामास?
5. मारुतिः रावणस्य समीपं गन्तुं कथं शक्तः अभवत्?

II. सन्धिं प्रदर्शयत—
1) गच्छन्+तत्र । 3) रावणः+अथ ।
2) रमा+इह । 4) इति+एनाम् ॥

III. क्रियारूपं वदत—
1) आस्ते 2) ददर्श 3) समयाचत ॥

IV व्याकरणविशेषं वदत—
1) आस्ते स्म 2) विषादं मा कृथाः ॥

V. विग्रहवाक्यं लिखत—
1) नीतिमान् 2) शक्रजित् 3) मारुतिः 4) पादपः ॥

## युद्धकाण्डे प्रश्नाः ॥

I. 1. श्रीरामः समुद्रस्य पारं कथं प्राप?
2. रामः लक्ष्मणश्च कथं केन बद्धौ? कः व्यमोचयत्?
3. हन्तुं न्ययुङ्क्त च—कं न्ययुङ्क्त? सः केन कथं हतः?
4. देवान्तकं नरान्तकम्, अतिकायं कुंभं निकुंभं च के के अवधिषुः?
5. दुःखितो हनूमांस्तत्र—हनूमतः दुःखस्य कारणं किम्?
6. विभीषणः श्रीरामं सान्त्वयन् किमब्रवीत्?
7. इन्द्रजितः वधानन्तरं रावणस्य विलापं संग्रहेण लिखत।
8. ऐन्द्रे रथे स्थितः रामः कथं अराजत्?

9. देवसङ्घाः मुनयश्च श्रीरामं किमवदन्?
10. श्रीरामस्य अदर्शनेन भरतः किं कर्तुम उद्यतः?
11. तोषं तथा प्रापुर्जनाः भुवि—अत्र दृष्टान्ताः के?
12. श्रीरामस्य पट्टाभिषेकमहोत्सवं वर्णयत ॥

II. क्रियारूपं लिखत—
1) जघ्नुः 2) अवधीत् 3) नेदुः 4) रुरुधुः ॥

III. विग्रहवाक्यं लिखत—
1) रावणिः 2) राघवः 3) सन्तप्तहृदयः 4) भ्रातृपुत्रः ॥

IV. धातुं लकारं च वदत—
1) जहि 2) नय 3) रराज 4) जग्राह ॥

V. Give the Present Participles of:—
1) पीड् 2) कृ 3) अस् 4) दृश् 5) जि 6) गम् ॥

## उत्तरकाण्डे प्रश्नाः ॥

I. 1. श्रीरामः मैथिलीं किमर्थं तत्याज?
2. महर्षीन् कः पीडयन् आसीत्? तं कः अवधीत्?
3. विवरं दातुं सीता कुतः भूमिं प्रार्थितवती?
4. स मां रक्षतु चिन्मयः—सः कीदृशः? सः कुत्र प्रकाशते?

II. सति सप्तमी—Locative absolute—इत्येतस्य एकम् उदाहरणं वदत ॥

III. Give Past Participles of:—
1) तत्याज 2) प्रविवेश 3) अवाप 4) ररक्ष ॥

IV. विग्रहवाक्यं लिखत—
1) वनौकसः 2) मन्दधीः 3) मैथिली 4) दाशरथिः ॥

V. शब्दरूपं लिखत—
1) सद्भिः 2) एनाम् 3) माम् 4) पत्नीम् ॥

Translate into Sanskrit :—

1. Ramayana is written by वाल्मीकि.
2. विश्रवस् had three sons and one daughter.
3. Ravana having conquered इन्द्र brought कल्पक trees to लङ्का.
4. Lord विष्णु asked ब्रह्मा—why did you come with देवाs ?
5. A son named Rama was born to कौसल्या.
6. Rama having killed असुराs protected the sacrifice of the sage विश्वामित्र.
7. After the marriage Rama and his brothers returned to अयोध्या with their father.
8. "After passing 14 years in the forest I shall come to the city अयोध्या." Thus राम said to भरत.
9. Having seen सीता in अशोकवन, हनुमान् gave her Rama's अंगुलीयक.
10. He, who having killed रावण and other राक्षसs, protected the world, may protect us.

## Grammatical Instructions.

सन्धिः, विशेषणं, विशेष्यम्, अव्ययम्, उपसर्गः, विभक्त्यर्थः, आकाङ्क्षा, अन्वयः. These are important matters to be known for the study of Sanskrit Language. Students are expected to be capable of separating all words in poetry and prose. Then they must find out in each sentence, the Finite verbs, Subject (कर्ता), Object (कर्म), and their Adjectives (विशेषणम्). These words then are to be grouped in the following order:—

1. कर्ता—with its Adjectives.
2. कर्म Do.
3. क्रिया—with its Adverbs.

Thus the Prose order (अन्वय) will be known perfectly.

1. सन्धिः— प्रणिपत्य + अहम् = प्रणिपत्याहम्।
   रावणः + नाम = रावणो नाम।
   तत्र + एव = तत्रैव।
   काले + अथ = कालेऽथ॥

   सन्धिं प्रदर्शयत—(1) उक्त्वा + अदात् (2) सूर्यवंशे + अथ (3) ततः + अशोकेन (4) अर्चितः + रामः (5) पालनाय + एनम् (6) इति + उक्त्वा (7) मृगः + भूत्वा (8) लक्ष्मणः + चोदितः.

2. विशेषणम् (Adjectives and adverbs).
   विशेष्यम् (Nouns).
   Example:—धीमान् रामः. लोकपीडनतत्परां ताटकाम् अवधीत्—इति वाक्यम्.
   अत्र 'धीमान्' इति पदं 'रामः' इति पदस्य विशेषणम्.

'लोकपीडनतत्पराम्' इति पदं 'ताटकाम्' इति पदस्य विशेषणम्.
रामः, ताटकाम् इति द्वे अपि पदे विशेष्ये.
एवं सर्वेषु श्लोकेषु द्रष्टव्यम्.

3. अव्ययम् (Indeclinables)—

शब्दरूपं, क्रियारूपं वा यस्य पदस्य नास्ति तत् अव्ययम्—
पुरा, प्रणिपत्य, गत्वा, तत्र, एव, च, ततः, तु, नाम, कर्तुं, सह, साकम्, अपि, अथ, तथा, कदाचित्, द्रुतम्, यथाविधि—इत्यादीनि अव्ययानि.

4. उपसर्गाः (Prepositions)—

Prepositions are prefixed to the roots to modify the original sense. Ex. नी (नय्) to lead. नयति leads. परिणयति marrys. दिश् to give. दिशति gives. उपदिशति advises.

उपसर्गाः यथा—
अधि, अनु, अप, अभि, अव, आ, उद्, उप, परि, प्र, प्रति, वि, सम्, अन्तर्, आविर्—इत्यादयः.
श्री रामोदन्ते बालकाण्डात् उपसर्गयुक्तानि क्रियापदानि वदत

5. आकाङ्क्षा (Analysis), अन्वयश्च—

सर्वस्मात् वाक्यात् प्रथमं क्रियापदं ज्ञात्वा तदुपरि कः, कम्, कीदृशः, कथंभूतः इत्यादि प्रश्नः कर्तव्यः. अस्य आकाङ्क्षा इति नाम. अस्य एत् उत्तरं जायते तस्य अन्वयः (Prose order) इति नाम.

Example :—तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः—
तुष्टाव—कः, कं, कथं तुष्टाव? इति प्रश्नः. अस्य उत्तरम्—विधाता हृषीकेशं विविधैः स्तवैः तुष्टाव—इति.

## USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.,

**By T.K. RAMACHANDRA AIYAR, M.A., B.O.L.**

## BOOKS ON SANSKRIT PROSE

| | Rs. P. |
|---|---|
| बालारामायणम्-बाल-अयोध्या-आरण्यकाण्डा:- A Simple Prose Version of Valmiki Ramayana retaining the idioms of the original | 30.00 |
| Do किष्किन्धा सुन्दर-युद्धकाण्डा:- Part II | 20.00 |
| चन्द्रापीडचरितम् - The story of Bana's Kadambari Concisely written, Text with Eng., Trans. | 38.00 |
| English Translation and Notes on Kadambari Sangraham- Mahasveta Vritanta (Without Text) | 20.00 |
| Do Sukanasa Upadesa | 10.00 |
| मृच्छकटिक नाटक कथासंग्रह: | 45.00 |
| A short History of Sanskrit Literature - Covering the whole range of Vedic, Sutras, Classical periods, Maha Kavyas, Darsanas etc. | 50.00 |
| कुवलायानन्द:-श्रीमदप्पय्यदीक्षित विरचित: (वृत्तिरहित:) 50 selected Alankaras with the commentary "Samanvaya" in Sanskrit and English | 35.00 |
| लघुवृत्तरत्नाकर:- A Small Hand Book on 40 selected commonly used classical metres with English Notes and illustrations from Popular Kavyas for the use of University Students. | 25.00 |
| A Guide to the Study of Comparitive Philogy with special reference to Sanskrit | 75.00 |

## USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation
Exhaustive Notes, Model Questions etc.

**By T.K. RAMACHANDRA AIYAR, M.A., B.O.L.**

## BOOKS ON SANSKRIT POETRY

रघुवंशमहाकाव्यम्-

| | | |
|---|---|---|
| | (दिलीपस्य वसिष्ठाश्रमगमनं नाम प्रथम: सर्ग:) | 30.00 |
| Do | दिलीपस्य नन्दिनीवरप्रदानं नाम द्वितीय: सर्ग: | 23.00 |
| Do | रघुदिग्विजयो नाम चतुर्थ: सर्ग: | 20.00 |
| Do | अजस्वयंवराभिगमनो नाम पंचम: सर्ग: | 20.00 |
| Do | दण्डकाप्रत्यागमनो नाम त्रयोदर्श: सर्ग: | 25.00 |
| नलोपाख्यानम् (श्रीमन्महाभारते वनपर्यणि अध्याया: 50-54) | | 20.00 |
| श्रीकृष्णविलासकाव्यम्-सुकुमारकवि विरचितम् 'विलासिनी' व्यारव्या सहितो भूभारापनोदन प्रार्थना नाम प्रथम: सर्ग: | | 20.00 |
| Do | बालक्रीडा वर्णनं नाम तृतीय: सर्ग: | 36.00 |
| कुमारसंभवे उमोत्पति: नाम प्रथमसर्ग: | | 30.00 |
| Do | उमापरिणयो नाम सप्तम:सर्ग: | 30.00 |
| किरातार्जुनीयम-प्रथम: सर्ग: | | 25.00 |
| श्री मत्महाभारते आरप्यपर्वणि मक्षप्रश्न: | | 20.00 |

## BOOKS ON SANSKRIT DRAMA

| | | |
|---|---|---|
| दूतवांक्यम् | of Bhasa | 35.00 |
| कर्णभारम् | Do | 35.00 |
| स्वप्नवासवदतम् | Do | 50.00 |
| प्रतिमानाटकम् | Do | 75.00 |
| मध्यव्यायोग: | Do | 30.00 |
| उरुभंगम् | Do | 20.00 |
| नाधानन्धम् | Do | 60.00 |
| रुद्रभाष्यम् | | 35.00 |

**R. S. VADHYAR & SONS, PALGHAT** - 678 003.

Madras Stockists: Vijaya Stores, Mylapore, Madras - 4.

Ebenezer, Thrissur-12. Ph: 2360992